[E. & L. / 114]
1,000—20-1-11.

# Educational (1912) Department.

ORDINARY MS.

**G.O., No.** 428

**DATED** 18-3-1912

(17)

[Despatch Abstract.]

Publication — Purchasing seven sets of the entitled the "Sri Balamanorama" and making a distribution of the copies

## BACK PAPERS.

| G.O. | No. | Department. | Date. | G.O. | No. | Department. | Date. |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

## FURTHER PAPERS.

| G.O. | No. | Department. | Date. | G.O. | No. | Department. | Date. |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

[ E. & L. / 68 ]
2,000—25-2-08.

E&L ~~Legislative~~ Department.

# CURRENT FILE.

## CONTENTS.

| From | Number. | Date. | Pages. |
|---|---|---|---|
| | | | |

[P. T. O. for put up papers]

PAPERS PUT UP WITH CURRENT No.

Papers of the department to which the current belongs.

| Number. | Date | Original (=O.) or spare copy (=S. C.). | Remarks. (In this column such of the papers as have been removed for copying, printing, etc., should be marked with a cross.) | Initials of Referencer with date in token of return to Reference department. |
|---|---|---|---|---|
| | | | | |

Papers of other departments.

| Department. | Number. | Date. | Original (=O.) or spare copy (=S. C.). | Despatcher to note the return of the papers to the departments concerned. |
|---|---|---|---|---|
| | | | | |

Edl C no 1034
Recd 1-4-12

1/2

LOCAL & MUNICIPAL -1 APR 1912 SECRETARIAT

To

The Secretary to Government,
Educational Department,
Fort Saint George,
M a d r a s.

The humble memorial of S. Chandrasekara Sastrigal, Editor and publisher, Sri Balamanorama, Teppakulam, Trichinopoly, respectfully showeth:--

1. The memorialist is the Editor and Publisher of a Sanskrit work known as the "Sri Balamanorama", which is a rare and valuable commentary on the SIDDHANTA KAUMUDI, the famous Sanskrit Grammar. It is intended to explain and elucidate the intricate principles and rules of Sanskrit Grammar in general and of SIDDHANTA KAUMUDI in particular.

2. This work was until lately available, if at all, only in obscure and moth-eaten manuscripts, and the memorialist was able to secure a collection of these rare manuscripts only with considerable difficulty and on paying a heavy price.

3. The memorialist has been editing the said publication in monthly parts during the last 6 years and the whole work has now been completed in 2 decently bound Volumes covering in all nearly 2,000 pages of Royal octavo size closely printed in DEVANAGARI characters.

4. Though the task was a gigantic one, the memorialist undertook it solely with a view to 'unearth', as it were, a valuable hidden treasure, and to place it within the reach of all lovers of Sanskrit literature.

5. The memorialist submits that he has had to undergo great difficulties in financing this publication and in getting the right men for the work, and has, in short, been able to

complete

complete the task at a considerable self-sacrifice as will be seen from some of the testimonials appended to the prospectus submitted herewith. The publication has cost the memorialist Rs. 14,500 of which he has been able to realise Rs. 8,000 as sale proceeds of copies and the remaining cost amounting to Rs. 6,500 he has met partly by loan and partly by the sale of his landed estate and of jewels. He is now involved in debts.

6. The publication has been highly spoken of by some of the eminent men all over India and Germany as will be seen from their select ~~select~~ opinions printed in the two inner sides of ~~prospectus~~ the covering sheets of the specimen copy attached, and the memorialist begs to advise despatch per separate book post of a copy of his humble work, in the hope that Government will be pleased to peruse the same and appreciate its merits.

7. The benign Government have always been ready to encourage the revival of the ancient learning and literature of India by sanctioning very liberal HONORARIA to deserving persons, by making large grants, and by ordering for a number of copies of the favoured publication in token of their support and appreciation of the same.

8. The Government have under their control and management a large number of Schools and Colleges where the study of Sanskrit is encouraged, and there are besides a number of public libraries under the control of Government where rare works of every description are collected for the benefit of the public and as a matter of general interest.

9. It is the humble wish of the memorialist that every important school or college and every public library and museum in the Province should be supplied at least with a copy of such a rare and standard publication as this, and if the Government are pleased to order for a large number of copies of the same, the memorialist will be happy and willing to offer them

at



at more favourable rates than their market price, solely ~~with~~ with a view to advance the cause of the students for whose benefit this work is intended.

10. The memorialist therefore humbly prays that the Government may be graciously pleased to peruse the pages of the accompanying publication, and bestow their esteemed patronage on this rare Sanskrit work in any manner in which they may be pleased to do so.

For this act of kindness and charity the memorialist shall, as in duty bound, ever pray.

Teppakulam, Trichinopoly,

1st April 1912.

शं चन्द्रशेखरशास्त्री

Editor and Publisher,

Sri Balamanorama.

# Specimen and Prospectus of Sri Balamanorama.

**Completely Ready!** **Ready for Sale!!**

# SRI BALAMANORAMA

## A SIMPLE AND LUCID COMMENTARY ON SIDDHANTA KAUMUDI.

VYAKARANA, or Sanskrit Grammar, is reckoned as one of the Vedangas (or limbs of the Vedas), and a knowledge of Vyakarana is an essential condition for the right understanding of the Vedas and the Vedanta, the proper study of which (and the consequent realisation of the Brahman) is the end of man's existence on earth. For a knowledge of what meaning or meanings Sanskrit roots, words and idioms are capable of holding, is pre-eminently the basis on which the firm structure of Vedic knowledge rests.

Students of Panini and Siddhânta Kaumudî usually feel the want of a simple, clear and exhaustive elucidation of the Sutras in their practical application. Such a want is fully supplied by the BALAMANORAMA, which, as its name implies, will make the study of Sanskrit Grammar a pleasant recreation. The BALAMANORAMA is a full and lucid exposition of the Siddhânta Kaumudî. Other commentaries on the Siddhânta Kaumudî are as difficult as the Kaumudî itself, and are more pretentious and cause an amount of discussion which seems bewildering to the student. The BALAMANORAMA is lucid in the highest degree. It explains the Kaumudî so fully and easily that any student can, even without a teacher, understand it completely; in fact, this single book alone can teach the student much better than a number of learned Pandits, ready to clear whatever doubts and answer whatever difficulties the student is likely to meet with during his study of the Siddhânta Kaumudî. The aphorisms (Sutras) of Panini have been excellently explained and illustrated. It is of immense value to all readers; for they find in a nut-shell all that is worth knowing in the Vyakarana collected together from Kâshika, Mahâbhâshya, Sêkhara, Kaiyata, and other well-known works on the subject.

The publication is finishing with SAVARTHIKAGANAPATHASHTADHYAYI, DHATUPATHA, etc. The book is printed on fine paper and with good Devanagari characters, and covers about 2000 pages; each part of the book covering about 1000 pages. As this is the first edition, I am obliged to price the book at various rates.

Inland:—For Public Institutions, Rs. 25 per copy.

For *bona fide* poor students, Rs. 15 per copy (if the complete set be bought); and Rs. 10 per *part* (if bought separately.)

For others, Rs. 20 per copy.

Foreign rate, Rs. 25 per copy. (Postage extra.)

I undertook the publication of this very rare book some 5 years ago, with the full assurance that all lovers of learning would encourage me in this big task. The book has now by the grace of God attained completion notwithstanding the many difficulties of getting money and the right men for the work; but I have devoted the whole of my small fortune to editing this book and have been put in straitened circumstances. I now appeal to all sympathetic sons of wealth to support and encourage me in my distressed situation by giving me donations. I appeal to one and all the lovers of Sanskrit learning to support me by ordering for copies of the book at their earliest opportunity.

All correspondence should be made only in English *fully* and *legibly*.

*N.B.*—For every ten copies purchased at a time one copy will be given gratis.

S. CHANDRASEKHARA SASTRIGAL,
*Editor and Publisher Sri Balamanorama,*
Teppakulam Post, TRICHINOPOLY.

St. J. I. S. Press, Trichy.

## ४५४ । अजाद्यतष्टाप् । (४-१-४) ।

अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात् ।

---

भाष्ये "अवश्यन्तावत् कश्चित् स्वकृतान्त आस्थेयः" इति, वैयाकरणसिद्धान्त इत्यर्थः । "कृतान्तौ यमसिद्धान्तौ" इत्यमरः। तत्र टिघुभादिसंज्ञावल्लघुसंज्ञामकृत्वा महासंज्ञाकरणसामर्थ्यात् सति सम्भवे स्तनकेशवतीत्यादिलौकिकं लिङ्गमप्यत्राश्रीयते । अन्यथा 'पशुना यजेत' इत्यत्र स्त्रीव्यक्तावपि सत्त्वाद्युपचारात्मकपुंस्त्वाद्यनपायात् 'आङो नाऽस्त्रियाम्' इति नाभावस्याविरोधात् स्त्रीपशुरप्यालभ्येत। तदेतच्चतुर्थस्य प्रथमपादे 'तथालिङ्गम्' इत्यधिकरणे अध्वरमीमांसाकुतूहलवृत्ताववोचाम। त्रिविधमपि एतल्लिङ्गं जातिव्यक्तिवत् प्रातिपदिकार्थ एव। प्रत्ययार्थत्वे प्राधान्यापत्तौ अजा, खट्वा, इत्यादौ स्त्रीत्वविशिष्टतादात्म्यावच्छिन्नानादिबोधोऽनुभवसिद्धो विरुध्येत । किञ्च मातृदुहितृस्वसृगवादिशब्देषु विनापि टाबादिप्रत्ययं स्त्रीत्वविशिष्टार्थस्य बोधात् प्रातिपदिकस्य तत्र शक्त्यावश्यकत्वे टाबादीनामपि शक्तिकल्पने गौरवम् । 'ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः, प्रावृड्विप्रुड्रुक्त्विषः' इत्यादिलिङ्गानुशासनसूत्राण्यपि प्रकृतिविषयाण्येव दृश्यन्ते । अत एव च 'कृदिकारादक्तिनः' इत्यत्र अक्तिन इत्येतदर्थवत् । अन्यथा क्तिनैव स्त्रीत्वस्योक्तत्वात् ङीपोऽप्राप्तेः तद्वैयर्थ्यं स्पष्टमेव । न चैवमपि प्रकृत्यैव स्त्रीत्वस्योक्तत्वात् कथं टाबादय इति वाच्यम् । द्वावित्यादिवत् प्रकृत्युक्तस्याव्यावर्तकत्वात् । अन्यथा टाबादिविधिवैयर्थ्यात् । तथा च स्त्रीत्वमिह प्रातिपदिकस्यैव वाच्यम् । टाबादयस्तु तद्द्योतकाः । तथा च टाबादिषु सत्सु अवश्यं स्त्रीत्वबोधः इति नियमः, न तु टाबादिषु सत्स्वेवेति नियम इति । **अजाद्यतष्टाप्** ॥ अजः आदिर्येषां ते अजादयः ते च अच्चेति समाहारद्वन्द्वात् षष्ठी 'ङ्याप्प्रातिपदिकात्' इत्यतः प्रातिपदिकादित्यनुवृत्तं षष्ठ्या विपरिणतम् अजादिभिः अता च विशेष्यते, तदन्तविधिः । तत्राद्विषये 'समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधो वक्तव्यः' इति निषेधो न, 'उगिद्वर्णग्रहणवर्जम्' इत्युक्तेः। ङ्याब्ग्रहणन्तु नानुवर्तते 'स्त्रियाम्' इत्यधिकारे तयोर्विधेयत्वात् । न च अजादिभिः प्रातिपदिकस्य विशेषणेऽपि तदन्तविधिर्नास्ति 'समासप्रत्ययविधौ' इति 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न' इति च निषेधादिति वाच्यम्। 'शूद्रा चामहत्पूर्वा जातिः' इत्यत्र अमहत्पूर्वेति वचनेनात्र तदन्तविधिज्ञापनात् । किञ्च स्त्रियां व्यक्तौ गम्यमानायामिति नार्थः । तर्हि अजा खट्वेत्यादौ अजत्वाद्याकारेण वस्तुतः स्त्रीव्यक्तौ गम्यमानायां टाबादिप्रत्ययाः स्युः । ततश्च टाबादिप्रत्ययेषु प्रयुज्यमानेषु स्त्रीत्वस्य भानन्न नियतं स्यात् । अतः स्त्रियामिति भावप्रधानो निर्देशः । स्त्रीत्वे इति यावत् । तदाह । **अजादीनामित्यादिना** ॥ अजाद्यन्तानामित्यर्थः । **द्योत्ये इति** ॥ उक्तरीत्या स्त्रीत्वस्य प्रातिपदिकार्थत्वादिति भावः। उक्तं च भाष्ये "स्त्रियां यत् प्रातिपदिकं वर्तते तस्माट्टाबादयो भवन्ति स्वार्थे" इति। **टाप् स्यादिति** ॥ 'प्रत्ययः, परश्च' इत्यधिकृतम् । कस्मात् परो भवतीत्याकाङ्क्षायां सन्निधानात् अजादिभ्यः अदन्ताच्चेति बोध्यम् । ननु अजादिगणे अज, अश्व, इत्याद्यदन्तपाठो व्यर्थः, अदन्तत्वादेव सिद्धेरित्यत आह । **अजाद्युक्तिरिति** ॥ 'वयसि प्रथमे, जातेरस्त्रीविषयात्' इत्यादिवक्ष्यमाणस्य ङीपो ङीषश्च अदन्तटाबपवादस्य बाधनार्थमजादिग्रहणमित्यर्थः । एवञ्च अदन्तटाबपवादौ ङीप्ङीषौ तयोः



---

गान्न भवति । ननु कृतः कटः पूर्वमनेनेति विग्रहे कृतशब्दस्य पूर्वशब्देन समासो न सम्भवति। कृतशब्दस्य कटशब्दसापेक्षत्वेन सामर्थ्यविरहात् । अत एव तद्धितः इनिप्रत्ययोऽपि दुर्लभः । किञ्च कृत इति क्तप्रत्ययेन कटस्य कर्मणोऽभिहितत्वेन ततष्षष्ठ्याः प्राप्तिरेव नास्तीति किं तन्निवृत्त्यर्थेन कृद्ग्रहणेन । क्तप्रत्ययेन कृता अभिहितत्वादेव कटात् द्वितीया दुर्लभेति चेन्न, कृत अम् पूर्व अम् इत्यलौकिकविग्रहवाक्ये कटस्यासन्निहिततया कर्मत्वेनान्वयासम्भवेन कृञ्धातोस्तदानीमकर्मकतया कर्मणि क्तप्रत्ययस्यासम्भवे सति 'नपुंसके भावे क्तः' इति भावे क्तप्रत्यये कृते सति कृतशब्दस्य कटशब्दसापेक्षत्वाभावात् समासतद्धितौ निर्बाधौ । ततश्च कृतपूर्वीति तद्धितान्तस्य पूर्वं कृतवानित्यर्थः पर्यवस्यति । किं कृतवानिति कर्मजिज्ञासायां कटमित्यन्वेति । गुणभूतयापि क्रियया कारकसम्बन्धस्य कटं कृतवानित्यादौ दर्शनात् । तच्च कर्मत्वं न क्तप्रत्ययेनाभिहितम्, तस्य भावे विधानात् । नापीनिप्रत्ययेन । तस्य कर्तरि विधानात् । तथा च असति कृद्ग्रहणे षष्ठी स्यात् । तन्निवृत्त्यर्थं कृद्ग्रहणमिति भाष्ये स्पष्टम् । न च निष्ठायोगे निषेधादेवात्र षष्ठी न भविष्यतीति वाच्यम् । 'नपुंसके क्ते भावे षष्ठ्या उपसङ्ख्यानम्' इति 'क्तस्य च वर्तमाने' इति सूत्रस्थवार्तिकेन निष्ठायोगे षष्ठीनिषेधस्यात्राप्रसक्तेः । तथा च षष्ठ्यभावे उक्तरीत्या अनभिहितत्वात् द्वितीया सुलभैव । न च कृतेऽपि कृद्ग्रहणे षष्ठी दुर्वारा । कृतेति क्तप्रत्ययात्मककृद्योगस्य सत्त्वादिति वाच्यम् । कृद्ग्रहणसामर्थ्येन भाष्योदाहरणेन च वृत्त्यन्तर्भावानापन्नकृद्योगस्य विवक्षितत्वात् । प्रकृते च कृतेत्यस्य तद्धितवृत्त्यन्तर्भूतत्वान्न तद्योगष्षष्ठीनिमित्तम् । न चैवं सति ओदनस्य पाचकतमः, ओदनस्य पाचकग्रहणम्, इत्यादौ षष्ठी न स्यात् । वृत्त्यनन्तर्भूतकृद्योगाभावात् । तथा च ओदनं पाचकतमः, ओदनं पाचकग्रहणम्, इति द्वितीयैव स्यादिति वाच्यम् । इष्टापत्तेः । अत एव मतुबधिकारे 'प्रज्ञाश्रद्धार्चाभ्यो णः' इत्यत्र 'प्राज्ञो व्याकरणम्' इति उदाहरिष्यते मूलकृता । न चैवं घटः क्रियते इत्यत्रापि कर्मणो विवक्षाभावमाश्रित्य भावलकारे सति अनन्तरं घटस्य कर्मत्वेनान्वयसम्भवात् अनभिहितत्वात् द्वितीया दुर्वारेति वाच्यम् । वैषम्यात् । कृतपूर्वीत्यत्र हि अलौकिकविग्रहदशायां कटशब्दस्यासन्निधानात् कर्मणो विवक्षा न सम्भवतीति भावे क्तप्रत्यय इति युक्तमाश्रयितुम् । क्रियते इत्यत्र तु न सम्भवत्येवाविवक्षा । कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपवृत्तिपञ्चकानन्तर्भूतत्वेन वृत्तिशून्यतया विग्रहाभावात् । तथा च वृत्तिविषय एवायं व्युत्पत्तिप्रकार इति प्राचीनमतानुसारी पन्थाः । शब्देन्दुशेखरे तु ओदनं पाचकतमः इत्यादौ द्वितीया असाधुरेव, षष्ठ्येव साधुरिति प्रपञ्चितम् । विस्तरभयान्नेह तल्लिख्यते । ननु भट्टिकाव्ये "ददैर्दुःखस्य मादृग्भ्यो धायैरामोदमुत्तमम् । लिम्पैरिव तनोर्वातैश्चेतयस्स्यात् ज्वलो न कः ॥" इति श्लोकोऽस्ति । श्रीरामस्य विरहार्तस्य वाक्यमेतत् । अत्र दुःखस्येति तनोरिति च कर्मणि षष्ठी । मादृग्भ्यो दुःखं ददैर्ददद्भिः पुष्पादीनाम् आमोदं परिमळं धायैः पोषकैः तनोः तनुं शरीरं लिम्पैः लिम्पद्भिः कः चेतयः प्राणी ज्वलः ज्वलन्निव न स्यादित्यर्थः । अत्रामोदस्योत्तमस्येति कर्मणि षष्ठ्या भाव्यम् । धायशब्दस्य पोषणार्थकधाञ्धातोः 'ददातिदधात्योः' इति णप्रत्ययात्मककृदन्तत्वादिति चेन्न । उत्तममामोदं पुष्पादीनां गृहीत्वा

'तस्येदमित्यपत्येऽपि बाधनार्थं कृतं भवेत् ।
उत्सर्गः शेष एवासौ वृद्धान्यस्य प्रयोजनम् ॥' (वा २५८१–२५८४)

---

पुष्करसद्शब्दस्य अनुशतिकादौ पाठात् । तत्र यद्यादिवृद्धिरन्त्योपधावृद्धी न बाधेत, तदा आदिवृद्ध्या उपधावृद्ध्या च पौष्करसादेः सिद्धत्वात् अनुशतिकादौ पुष्करसच्छब्दपाठोऽनर्थकः स्यात् । अतस्तक्रकौण्डिन्यन्यायात् 'सत्यपि सम्भवे बाधनं भवति, इति विज्ञायते" इति भाष्ये स्पष्टम् । **तस्येदमित्यपत्येऽपीत्यादि** ॥ श्लोकवार्तिकमिदम् । तत्र प्रथमचरणस्यायमर्थः । तस्येदमिति विहितः अण् अपत्येऽर्थेऽपि भवति, इदमर्थे तस्याप्यन्तर्भावात् । अतस्तस्यापत्यमित्यणिवधानं व्यर्थमित्याक्षेपः । न च 'अत इञ्' इत्याद्युत्तरसूत्रार्थं 'तस्यापत्यम्' इत्यावश्यकमिति वाच्यम् । एवं हि सति 'तस्यापत्यमत इञ्' इत्येकमेव सूत्रमस्तु । तथा च 'तस्यापत्यम्' इति पृथक्सूत्रकरणं व्यर्थमित्याक्षेपः पर्यवस्यति । अत्र समाधत्ते । **बाधनार्थं कृतम्भवेदिति** ॥ 'तस्येदम्' इत्यणं बाधित्वा 'वृद्धाच्छः' इति छः अपत्ये प्राप्तः, तद्बाधनार्थं 'तस्यापत्यम्' इति पृथक्सूत्रङ्कृतमित्यर्थः । ननु 'वृद्धाच्छः' इति सूत्रं शेषाधिकारस्थम्, अपत्यादिचतुरर्थ्यन्तेभ्योऽन्यः शेषः । तथा च अपत्यार्थस्य शेषाधिकारस्थत्वाभावात् तस्मात्तत्र छप्रत्ययस्याप्रसक्तेस्तद्बाधनार्थत्वं 'तस्यापत्यम्' इत्यस्य कथमित्यत आह । **उत्सर्गः शेष एवासाविति** ॥ उत्सृज्यते अदन्तबाह्वादिप्रकृतिभ्यो वियुज्यते इत्युत्सर्गः । कर्मणि घञ् । अदन्तबाह्वादिभिन्नप्रकृतिसम्बद्धः अपत्यार्थोऽसौ शेषो भवत्येवेत्यर्थः । आक्षेप्तुर्हि 'तस्यापत्यमत इञ्' इत्येकसूत्रमभिमतम् । विनियुक्तादन्यः शेषः, अदन्तबाह्वादिप्रकृतिसंयुक्तापत्यार्थ एव विनियुक्तः । न तु तद्भिन्नप्रकृतिसंयुक्तापत्यार्थोऽपि । ततश्च तस्य शेषत्वात्तस्मिन्नपत्ये छस्य प्रसक्तत्वात् तद्बाधनार्थं 'तस्यापत्यम्' इति पृथक्सूत्रम् । सति चास्मिन् पृथक्सूत्रे अदन्तबाह्वादिरूपप्रकृतिप्रकृतिसामान्यसंयुक्तापत्यार्थस्योपयुक्तत्वादशेषत्वाच्छस्य न प्राप्तिरित्यप्राप्तिसम्पादनद्वारा छबाधकत्वं 'तस्यापत्यम्' इति पृथक्सूत्रस्य सिद्धम् । अयमप्राप्तबाध इत्युच्यते । नन्वेवमपि उपगोरपत्यमित्यत्र उपगोरवृद्धत्वात् छस्य नैव प्रसक्तिरिति किं पृथक्सूत्रेणेत्यत आह । **वृद्धान्यस्य प्रयोजनमिति** ॥ भानोरपत्यं भानवः इत्यादौ यानि भान्वादिप्रातिपदिकानि वृद्धानि, यानि उपग्वादिप्रातिपदिकानि नामधेयत्वाद्वृद्धानि, तेभ्यः छप्रत्ययबाधनार्थं 'तस्यापत्यम्' इति पृथक्सूत्रमित्यर्थः । ननु 'तस्येदम्' इत्यणि इदन्त्वेन बोधः । 'तस्यापत्यम्' इत्यणि तु अपत्यत्वेन बोध इति शाब्दबोधे वैलक्षण्यसत्त्वात्, 'तस्येदमित्यपत्येऽपि' इत्याक्षेप एवायमनुपपन्न इति चेन्न । एतद्वार्तिकभाष्यप्रामाण्येन 'तस्येदम्' इति इदंशब्देन अपत्यस्य इदन्त्वेन ग्रहणाभावविज्ञानात् । "प्रदीयतान्दाशरथाय मैथिली" इति त्वार्षत्वान्न दुष्यतीत्यास्तां तावत् । **कृतसन्धेः किमिति** ॥ 'समर्थानां प्रथमाद्वा' इत्यधिकारसूत्रस्थसमर्थग्रहणलब्धं कृतसन्धेरित्येतत् किमर्थमिति प्रश्नः । **सौत्थितिरिति** ॥ सु शोभनः उत्थितः सूत्थितः । प्रादिसमासे सवर्णदीर्घः । सूत्थितस्यापत्यं सौत्थितिः, अत इञ्, सुब्लुक्, आदिवृद्धिः, 'यस्येति च' इत्यकारलोपः । कृतसन्धेरित्यभावे तु सु उत्थित इत्यस्यामेव दशायां सवर्णदीर्घात्परत्वादादिवृद्धौ कृतायामावादेशे सावुत्थितिरिति स्यादिति भावः । नन्वन्तरङ्गत्वात्सवर्णदीर्घे



## २१८३ । असिद्धवदत्राभात् । (६-४-२२)

इत ऊर्ध्वमापादपरिसमाप्तेराभीयम् । समानाश्रये तस्मिन्कर्तव्ये तदसिद्धं स्यात् । इति वुकोऽसिद्धत्वादुवङि प्राप्ते ।

---

खयः तेषां चरः चटतकपा इत्यर्थः । अत्रापि यद्वर्ग्याः स्थानिनः तत्तद्वर्ग्या आदेशा इत्यपि बोध्यम् । **तत्रापीति** ॥ तेष्वपि वर्ग्येषु प्रकृत्या स्वभावेन जशामेव सतां प्रकृत्या स्वभावेन जश एव सन्तस्तत्तद्वर्ग्या आदेशास्स्युः । एवं प्रकृत्या स्वभावेन चरामेव सतां प्रकृत्या स्वभावेन चर एव सन्तस्तत्तद्वर्ग्या आदेशास्स्युरित्यर्थः । पर्जन्यवल्लक्षणप्रवृत्तेरिति भावः । कुत इयं व्यवस्थेत्यत आह । **आन्तरतम्यादिति** ॥ झशां जशाञ्च घोषसंवारनादप्रयत्नसाम्यम् । खयां चराञ्च श्वासाघोषविवारप्रयत्नसाम्यम् । तत्तद्वर्ग्याणां तत्तद्वर्ग्या आदेशा इत्यत्र तु स्थानसाम्यं नियामकं बोध्यम् । तथा च प्रकृते अभ्यासभकारस्य बकारे सति बभूव् अ इति स्थिते अचिश्नुधात्वित्युवङादेशमाशङ्कितुमाह । **असिद्धवद** ॥ षष्ठस्य चतुर्थपादे इदं सूत्रम् । श्नान्नलोप इति सूत्रात् पूर्वं पठितम् । आभादित्यभिविधावाङ् भत्येत्यधिकारमभिव्याप्येत्यर्थः । भाधिकारश्च आपादपरिसमाप्तेरिति सिद्धान्तः । तथा च आपादपरिसमाप्तेरिति लभ्यते । विहितं कार्यमिति शेषः । किमारभ्येत्याकाङ्क्षायामुपस्थितत्वादस्मादेव सूत्रादूर्ध्वमिति लभ्यते । ततश्च 'श्नान्नलोपः' इत्यारभ्यापादसमाप्तेः विहितं यदाभीयं कार्यं तदसिद्धवद्भवति । प्रवृत्तमप्यप्रवृत्तं भवतीत्यर्थः । अधिकारसूत्रमिदमुत्तरत्र 'श्नान्नलोपः' इत्यादौ प्रतिसूत्रमुपतिष्ठते । तथा च शद्यत्सूत्रे इदमनुवर्तते । तत्तदाभीयकार्ये कर्तव्ये इति लभ्यते । एवञ्च श्नान्नलोप इत्यादितत्तदाभीयं कार्यं श्नान्नलोप इत्याद्याभीये कार्ये कर्तव्ये असिद्धवदित्यर्थः पर्यवस्यति । अत्रेत्यनेन निमित्तसप्तम्यन्तेन त्वसिद्धीभवतः कार्यस्य यन्निमित्तं तन्निमित्तके कार्ये कर्तव्ये सतीत्यर्थलाभात् समानाश्रये कार्ये कर्तव्ये सतीति लभ्यते । एतत्सर्वं भाष्ये स्थितम् । तदाह । **इत ऊर्ध्वमित्यादिना** ॥ **तस्मिन्निति** ॥ आभीये कर्तव्ये सतीत्यर्थः । एधि शाधीत्युदाहरणम् । अत्र 'ध्वसोरेद्धावभ्यासलोपश्च' इत्यस्तेरेत्वस्य शाहाविति शास्तेः शाभावस्य चाभीयत्वेनासिद्धत्वात् 'हुझल्भ्योहेर्धिः' इति हेर्धित्वमाभीयं प्रवर्तते । तथा जङ्घहीत्याद्यप्युदाहरणम् । हनधातोर्यङ्लुगन्तात् लोण्मध्यमपुरुषैकवचने सिपो हिभावे 'अनुदात्तोपदेश' इति नलोपस्याभीयस्यासिद्धत्वात् 'अतोहेः' इत्याभीयो लुङ्न भवति । समानाश्रय इति किम् । पपुष इत्यत्र पाधातोर्लिटः क्वसौ लिटिधातोरिति द्वित्वे अभ्यासह्रस्वे क्वस्वन्तात् द्वितीयाबहुवचने शसि वसोस्सम्प्रसारणमाभीयमातोलोप 'इटि च' इत्याल्लोपे आभीये कर्तव्ये असिद्धं न भवति । आल्लोपः क्वसौ, सम्प्रसारणन्तु शसीति भिन्नाश्रयत्वात् । आभीये कर्तव्ये इति किम् । अभाजिराग इत्यत्र भञ्जेश्चिणि रञ्जेर्घञि च कृते 'रञ्जेश्च, घञि च भावकरणयोः' इति नलोपस्याभीयस्यानाभीयायामुपधावृद्धौ कर्तव्यायान्नासिद्धत्वम् । आभादित्यभिविधिः किम् । भाधिकारात् प्रागित्युक्ते भूयानित्यत्र 'बहोर्लोपो भू च बहोः' इति बहोर्भूभावस्य ओर्गुणे कर्तव्ये असिद्धत्वन्न स्यात् । 'भस्य' इति सूत्रादूर्ध्वभावित्वादित्यलम् । **इति वुकोऽसिद्धत्वादिति** ॥ वुक

अजन्तोऽकारवान्वा यस्तास्यनिट् थलि वेडयम् ।
ऋदन्त ईदृङ्नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत् ॥

न च स्तुद्रुादीनामपि थलि विकल्पः शङ्क्यः । 'अचस्तास्वत्–' (२२९४) इति 'उपदेशेऽत्वतः' (२२९५) इति च योगद्वयप्रापितस्यैव हि प्रतिषेधस्य भारद्वाजनियमो निवर्तकः 'अनन्तरस्य–' इति न्यायात् । विवयिथ–विवेथ

---

**वेति** ॥ ऋदन्तभिन्नात्परस्य थल इट् स्यादेवेत्यर्थः । तथा च ऋदन्तभिन्नाद्धातोः परस्य थलो नेण्णिवृत्तिरिति भारद्वाजमते फलतीति न वैयर्थ्यमिति भावः । तथा च अनृदन्ताद्धातोः परस्य थलो भारद्वाजमते इट् । मतान्तरे तु अचस्तास्वदिति उपदेशेऽत्वत इति च तत्र नेडिति विकल्पः फलतीति भावः । तद्यथा । पपिथ । पपाथ । पेचिथ । पपक्थ । **अयमत्रेति** ॥ कृसृभृवृस्तुद्रुस्रुश्रुवो लिटीति, अचस्तास्वत्थल्यनिटो नित्यमिति, उपदेशेऽत्वत इति, ऋतो भारद्वाजस्य, इति च, सूत्रचतुष्टयस्य विषयाणां सङ्ग्रहो वक्ष्यत इत्यर्थः । **अजन्त इति** ॥ यः धातुः ऋदन्तभिन्नाजन्तः ह्रस्वाकारवान् वा तासौ नित्यानिट् सोऽयं थलि विकल्पितेट्क इति पूर्वार्धस्यार्थः । अत्र ईदृगित्यस्य तासौ नित्यानिडित्यर्थः । यः ऋदन्तस्तासौ नित्यानिट् सः थलि नित्यानिडित्यर्थः । 'अचस्तास्वत्' इति पाणिनिमते 'ऋतो भारद्वाजस्य' इति भारद्वाजमतेऽपि तस्य अनिट्कत्वादिति भावः । **क्राद्यन्य इति** ॥ क्राद्यष्टभ्योऽन्यो धातुः लिटि नित्यं सेडित्यर्थः । क्राद्यष्टभ्य एव परस्य लिटि नेडिति कृसृभृवृ इति सूत्रेण नियमितत्वादिति भावः । नन्वत्र क्राद्यन्य इत्युक्त्या क्रादीनां अष्टानां लिटि नित्यानिट्कत्वमवगतम् । तदनुपपन्नम् । स्तुद्रुस्रुश्रुवां ऋदन्तभिन्नत्वेन तेभ्यस्थलि अचस्तास्वदिति निषेधस्य भारद्वाजमते अप्रवृत्त्या इड्विकल्पस्य दुर्वारत्वात् । न चैवं सति कृसृभृवृ इति सूत्रे स्तुद्रुस्रुश्रुग्रहणमनर्थकमिति वाच्यम् । तुष्टुव तुष्टुमेत्यादौ वमादिषु क्रादिनियमप्राप्तस्य इटो निवृत्या चरितार्थत्वादित्याशङ्क्य निराकरोति । **न च स्तुद्रुस्रुश्रुवामपि थलीत्यादिना** ॥ कुत इत्यत आह । **अचस्तास्वदिति** ॥ ऋदन्तादेव परस्य थल इण्निषेधः । अनृदन्तात्परस्य तु थल इण्निषेधो नेति भारद्वाजमतम् । अयञ्च इण्निषेधस्य निषेधः 'अचस्तास्वत्' इति 'उपदेशेऽत्वतः' इति च सूत्रद्वयप्राप्तस्यैव इण्णिषेधस्य पक्षे निवर्तकः । न तु क्रादिसूत्रप्राप्तस्य इट्प्रतिषेधस्यापीत्यर्थः । कुत इत्यत आह । **अनन्तरस्येति** ॥ अचस्तास्वदिति उपदेशेऽत्वत इति ऋतो भारद्वाजस्येति च सूत्रक्रमः । कृसृभृवृ इति सूत्रन्तु ततः प्राग्बहुव्यवहितमिति भावः । किञ्च 'नेड्वशिकृति' इत्यादिप्रतिषेधकाण्डोत्तरं 'आर्धधातुकस्येड्वलादेः' इति विधिकाण्डारम्भसामर्थ्यादपि स्तुद्रुस्रुश्रुवामिण्निषेधो भारद्वाजनियमं बाधत इति 'नेड्वशिकृति' इत्यत्र 'वस्वेकाजाद्धसाम्' इत्यत्र च भाष्ये स्पष्टम् । ततश्च प्रकृते अजेस्थलि वीभावे तस्य अजन्तत्वात्तासौ नित्यानिट्त्वाच्च इड्विकल्प इति सिद्धम् । तदाह । **विवयिथ विवेथेति** ॥ सिबादेशस्य थल पित्वात् 'असंयोगात्' इति कित्वाभावाद्गुणः । इट्पक्षे अवादेशः ।



तथाहि । पश्यन्ति भवं भक्ताः । चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थः । प्रेरणांशत्यागे पश्यति भवः । विषयो भवतीत्यर्थः । ततो हेतुमण्णिच् । दर्शयन्ति

---

इति भाष्यप्रयोगो मानम् । अन्यथा तत्र 'अणावकर्मकात्' इति परस्मैपदापत्तेः । दर्शनविषयो भवतीत्यर्थे पश्यति भवः इत्यत्र दृशेरणावकर्मकत्वात् चित्तवत्कर्तृकत्वाच्च 'विभाषोपपदेन' इति विकल्पबाधविषये पूर्वविप्रतिषेधाश्रयणे तु व्याख्यानमेव शरणम् । अन्ये तु दर्शयते राजा इति भाष्यप्रयोगः फलस्य परगामित्वाविवक्षया भविष्यति । एवञ्च कर्तृगामिनि क्रियाफले परत्वादणावकर्मकादित्यस्य प्रवृत्तौ न किञ्चिद्बाधकमिति पूर्वविप्रतिषेधाश्रयणञ्चिन्त्यमित्याहुः । तच्चिन्त्यम् । अणावकर्मकादित्यस्य परगामिन्यपि फले परत्वात् प्रवृत्तेर्दुर्वारत्वात् । न ह्यणावकर्मकादित्यत्र कर्त्रभिप्राये इत्यस्ति । 'स्वरितञितः कर्त्रभिप्राये' इत्यस्य बहुव्यवहितत्वादिति शब्दरत्ने प्रपञ्चितम् । ननु दर्शनविषयो भवतीत्यर्थे दर्शयते भवः इत्यत्र वस्तुतो दर्शनकर्मीभूतस्यैव भवस्य कर्तृत्वविवक्षायां तस्य 'कर्मवत्कर्मणा' इति कर्मवद्भावात् 'भावकर्मणोः' इत्यात्मनेपदसिद्धेः 'णेरणौ' इति सूत्रं व्यर्थमित्यत आह । **कर्तृस्थेति** ॥ कर्तृस्थः भावो येषां ते कर्तृस्थभावकाः । कर्तृस्था क्रिया येषां ते कर्तृस्थक्रियाः एवंविधा धातव इह सूत्रे उदाहरणम् । 'कर्मवत्कर्मणा' इत्यस्य तु कर्मस्थभावकाः कर्मस्थक्रियाश्चोदाहरणमिति प्रकृतसूत्रे 'कर्मवत्कर्मणा' इति सूत्रे च भाष्ये स्पष्टम् । अतो विषयभेदात् 'कर्मवत्कर्मणा' इत्यनेन 'णेरणौ' इत्यस्य न गतार्थतेति भावः । अपरिस्पन्दनसाधनसाध्यो धात्वर्थो भावः । यथा दर्शनश्रवणादिः । सपरिस्पन्दनसाधनसाध्यो धात्वर्थः क्रिया । यथा पाकादिः । यद्यपि दर्शने चक्षुरुन्मीलनादिरूपं स्पन्दनमस्ति । तथापि तद्भिन्नहस्तपादादिचेष्टैवात्र स्पन्दनमित्यविरोधः । तत्र कर्तृस्थभावकमुदाहरति । **पश्यन्ति भवं भक्ता इति** ॥ सकर्मकेषु धातुषु फलव्यापारयोर्धातुः । यथा पचेर्विक्लित्त्यनुकूलो व्यापारः । तत्र विक्लित्तिः फलम् । तदनुकूलोऽधिश्रयणादिर्व्यापारः । धातूपात्तव्यापाराश्रयः कर्ता देवदत्तादिः । व्यापारव्यधिकरणधातूपात्तफलाश्रयभूतङ्कर्म । यथा तण्डुलान् पचतीत्यत्र विक्लित्त्याश्रयास्तण्डुला इति स्थितिः । प्रकृते च दृशेश्चाक्षुषज्ञानानुकूलव्यापारार्थकत्वे सकर्मकत्वानुपपत्तिः । फलस्य चाक्षुषज्ञानस्य तदनुकूलप्रयत्नादेश्च समानाधिकरणत्वात् । अतो दृशेश्चाक्षुषज्ञानविषयत्वापत्त्यनुकूलव्यापारोऽर्थः । तत्र ज्ञानविषयत्वापत्तिः फलम् । तदनुकूलः प्रयत्नादिर्व्यापारो देवदत्तनिष्ठः । एवञ्च प्रयत्नादिव्यापारव्यधिकरणचाक्षुषज्ञानविषयत्वरूपफलाश्रयो घटादिः कर्मेति युज्यते । तदेतदाह । **चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थ इति** ॥ **प्रेरणेति** ॥ यथा चाक्षुषज्ञानविषयत्वापत्तिरेव दृशेरर्थो विवक्षितः । न तु तदनुकूलव्यापारः कृञ्धातुगम्यः प्रेषणांशः । तदा पश्यति भवः इत्यस्य चाक्षुषज्ञानविषयस्सम्पद्यते इत्यर्थः । सौकर्यातिशयविवक्षया अनुकूलव्यापारांशस्य अविवक्षा बोध्या । तथा च चाक्षुषज्ञानविषयत्वापत्तेरेव दृश्यर्थत्वात्तदाश्रयस्य भवस्य कर्तृत्वमेव । तदाह । **विषयो भवतीत्यर्थ इति** ॥ लक्षणया चाक्षुषज्ञानविषयो भवतीत्यर्थ इत्यर्थः । न चात्र भवस्य वस्तुतो दर्शनकर्मणः इह कर्तृत्वात् 'कर्मवत्कर्मणा तुल्यक्रियः' इति कर्मवत्त्वाद्यगादिकमेव स्यान्न तु शबादीति शङ्क्यम् । 'कर्मवत् कर्मणा' इत्यस्य कर्मस्थभावकेषु कर्मस्थक्रियेषु च प्रवृत्तेः । अतः कर्मकर्तर्यपि शबादिकमेवेति

**युष्मदस्मद्भ्यां सामानाधिकरण्याभावात्प्रथमपुरुषः। तिङ्वाच्यभावनाया असत्त्वरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि । किं त्वेकवचनमेव । तस्यौत्सर्गिकत्वेन**

---

मिति सिद्धान्तात् । एवञ्च फलोत्पत्त्यनुकूलव्यापारात्मिका क्रिया धात्वर्थ इति सिद्धम् । एतेन क्रियावाची धातुः धातुवाच्या क्रियेत्यन्योन्याश्रयोऽपि निरस्तः । उत्पत्त्यनुकूलव्यापारस्यैव क्रियात्वात् । तदुक्तम् । 'व्यापारो भावना सैवोत्पादना सैव च क्रिया' इति । ननु उत्पत्त्यनुकूलव्यापारस्यैव सर्वत्र धातुवाच्यत्वे सर्वेषां धातूनामेकार्थत्वापत्तिः । विक्लित्त्यादितत्तत्फलोत्पत्त्यनुकूलव्यापारार्थकत्वन्तु न सम्भवति । एकैकस्य धातोर्विक्लित्त्यादितत्तत्फलांशे तदनुकूलव्यापारात्मकव्यापारसामान्ये च वाचकत्वानुपपत्तेरित्यत आह । **सा च धातुत्वेन सकलधातुवाच्येति** ॥ पच्यादयो धातुत्वेन रूपेण उत्पत्त्यनुकूलव्यापारात्मिकां क्रियामाहुः । पचित्वादिविशेषरूपेण तु विक्लित्त्यादितत्तत्फलांशमाहुः । तथा च वाचकतावच्छेदकभेदाद्विक्लित्त्यादिफलविशेषस्य क्रियासामान्यस्य च वाच्यता सङ्गच्छते इति भावः । तथा च भट्टिराह । 'विभज्य सेनां परमार्थकर्मा सेनापतींश्चापि पुरन्दरोऽथ । नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्विव सर्वधातून् ॥' इति । अस्तिभवतिविद्यतीनामपि सत्तानुकूलव्यापार एवार्थः । तत्र सत्ता आत्मभरणम् । तदनुकूलव्यापारस्तु जायते अस्ति विपरिणमते, वर्धते, अपक्षीयते, विनश्यति, इति वार्ष्यायणिप्रणीतषड्भावविकारेष्वन्यतमो यथायथं ज्ञेयः । भूवादिसूत्रे भाष्ये स्पष्टमेतत् । प्रपञ्चितञ्च मञ्जूषायामित्यलम् । ननु उत्पादनात्मकक्रियारूपस्य भावस्य धातुवाच्यत्वे 'लः कर्मणि च भावे च' इति भावे कथं लकारविधिः । अनन्यलभ्यस्यैव शब्दार्थत्वादित्यत आह । **भावार्थकलकारेणानूद्यते इति** ॥ द्वौ त्रयः इत्यादौ द्विवचनबहुवनवदिति भावः । **युष्मदस्मद्भ्यामिति** ॥ युष्मदि अस्मदीति च तिङ्समानाधिकरणे उपपदे मध्यमोत्तमपुरुषौ विहितौ । युष्मदस्मदोस्तिङ्सामानाधिकरण्यञ्च तिङ्वाच्यकारकवाचित्वमेव । भावलकारे तु आस्यते त्वया आस्यते मया इत्यादौ भाव एव तिङ्वाच्यः । न तु युष्मदस्मदर्थौ । अतो न मध्यमोत्तमावित्यर्थः । कर्मलकारे तु त्वं वन्द्यसे अहं वन्द्ये इत्यादौ लकारस्य युष्मदस्मदोश्च सामानाधिकरण्यसम्भवात्पुरुषत्रयमपि यथायथमुदाहरिष्यते । **तिङ्वाच्येति** ॥ सत्त्वं द्रव्यं लिङ्गसङ्ख्यान्वययोग्यम् । तिङ्वाच्या या भावना क्रिया सा असत्त्वरूपा लिङ्गसङ्ख्यान्वयायोग्या । शब्दशक्तिस्वभावात् । ततश्च तस्याः तिङ्वाच्यभावनायां द्वित्वबहुत्वयोरप्रतीतेः युवाभ्यां युष्माभिर्वा आस्यते इत्यादौ न द्विवचनं बहुवचनञ्चेत्यर्थः । तिङ्वाच्येत्यनेन कृद्वाच्यायाः क्रियायाः लिङ्गसङ्ख्यान्वयित्वात्मकं सत्त्वरूपत्वमस्तीत्युक्तं भवति । तद्यथा । पाकौ पाकाः इत्यादि । तदुक्तम् । 'सार्वधातुके यक्' इति सूत्रे भाष्ये 'कृदभिहितो भावो द्रव्यवत्प्रकाशते' इति । द्रव्यवल्लिङ्गसङ्ख्यान्वयं लभते इत्यर्थः । शब्दशक्तिस्वभावादिति भावः । ननु तिङ्वाच्यभावनाया असत्त्वरूपतया द्विबहुवचनाभावे आस्यते इत्यादौ एकवचनञ्च न स्यादित्यत आह । **किन्त्वेकवचनमेवेति** ॥ तिङ्वाच्यभावलकारस्येति शेषः । **तस्येति** ॥ 'द्व्येकयोर्द्विवचनैकवचने' 'बहुषु बहुवचनम्' इति सूत्रन्यासं भङ्क्त्वा एकवचनं द्विबहुषु द्विवचनबहुवचने इति सूत्रन्यासः

## SELECTED OPINIONS.

**Kerala Varma, C. S. I., M. R. A. S., F. R. H. S., Valiya Koil Tampuran of Travancore, Trivandrum :—** "I do not think that any student of "Siddhânta Kaumudî" has benefited more than myself by the help derived from this commentary of Vasudeva Dikshita. When I was teaching "Siddhânta Kaumudî" to my nephew and brother etc., I had often recourse to this work for explanations on difficult passages in the text. That such a rare work is now being so beautifully and correctly brought out under your exertions, reflects no small credit upon you. "Bâlamanóramâ" would help a student of Vyâkarna not only to thoroughly understand "Siddhânta Kaumudî" but also would enable him to have a comprehensive view of what the highest and oldest authorities such as "Mahâ Bhâshya", "Kayyata", "Kâsika" etc., have stated on various points, as also what the more modern works such as "Praudhamanorama", Sekhara" etc., have stated on those points."

**Richard Schmidt, Ph. D., Bibliothek der Deutschen Morgenlandischen Gesellschaft :—** "I beg to say you my sincerest thanks for your valuable edition of the Bâlamanóramâ, Part I, of which you were so kind as to send to the signed Library. South Indian Pandits are now very much occupied in Sanskris philology, which is looked [illegible] Europe with great interest."

श्रीरस्तु । कल्याणं भवतु । शिवास्ते सन्तु पन्थान इति भृशमाशास्ते । तत्रभवतामनुचरः ।"

**P. Thakur Prasad, Vyakarnacharya, Professor of Paniniya and Vedanta, Govt. Sanskrit College Calcutta:—** "Bâlamanóramâ, a very good commentary on Siddhanta Kaumudi of Bhattoji Dikshita, which was up to this time unknown to the students of Panini, is now being published for the first time by Chandrasekhara Sastrigal. This work is an excellent explanation of Siddhanta Kaumudi and is easy enough to be understood by any reader of Panini. Many obscure and difficult passages, not explained in other Tikas, are clearly explained in this. The paper is good and the printing neat and correct. I hope that this work would be looked favourably on by the Government and the Public."

**Mahamahopadhyaya Dr. Satischandra Vidyabhushana, M. A., Ph. D., M.R.A.S., Professor of Sanskrit and Pali, Presidency College, Calcutta, Joint Philological Secretary, Asiatic Society of Bengal, and Fellow of the Calcutta University :—** "The Siddhanta Kaumudi with a comprehensive gloss called Balamanorama Tika, published in Trichinopoly by Pandit Chandrasekhara Sastri, is an excellent work which will, I am sure, prove useful to professors and students alike."

**Pandit Umapatidatta Sharma Pandeya, B. A., M. R. A. S., and M. R. S. A. (London); Member of the Asiatic Society of Bengal, The Sahitya Sabha, The Bangiya Sahitya Parishad, The Imperial Library, The Barabazar Library, The Kanyakubjamandal Pusthakalaya and The Hindi Sahitya Sabha, formerly Principal, Shri Vishuddhananda Saraswati Vidyalaya in Calcutta, The Nagaripracharini Sabha of Benares, The Nagaripracharini Sabha of Arrah; Senior Professor of Sanskrit, Meerut College, and Examiner, Calcutta University, etc., etc., etc. :—** "I have gone through your valuable edition of Paninian Vyâkaran in the new garb of Bâlamanóramâ. It will indeed be of immense value to the students when complete, for they will find in a nutshell all that is worth knowing in the Vyâkaran collected together from Kâshika, Mahâbhâshya, Siddhânta Kaumudi and other well-known works on the subject. The foot-notes contain sufficient hints to understand the text even without the help of a teacher, provided the student has an elementary knowledge of Sanskrit. Some of the aphorisms (Sutras) of Panini have been excellently elucidated. I wish this edition every success. Please send the other parts also when published. Thanking you in anticipation."

**Rao Bahadur M. Rangacharya, M. A., Professor of Sanskrit Comparative Philology, Presidency College, Triplicane, Madras :—** "I am glad to be able to say that I consider Mr. Chandrasekhara Sastri's edition of Bâlamanóramâ to be valuable. It is a well-known fact that the Bâlamanóramâ is of very great help to the students of the Siddhânta Kaumudî; and this edition, being so well printed and so accurate, deserves encouragement from all lovers of Sanskrit."

**The Honourable P. S. Sivaswamy Aiyer, B. A., B. L., C. I. E., Advocate General, Vishram Bagh, Mylapore, Madras :—** "Bâla-manó-ramâ is an easy and popular commentary on the Siddhânta Kaumudî of Bhattôji Deekshita, a work on Sanskrit Grammar which is witten in language too terse for beginners. The excellent edition of the Bâla-manó-ramâ which is now being brought out by Mr. Chandrasekhara Sastrigal of Trichinopoly, deserves encouragement at the hands of all interested in Sanskrit learning and in the diffusion of a good knowledge of the principles of Sanskrit Grammar."

**M. R. Ry. R. Krishnamachariar Avl., M. A., Sub-Assistant Inspector of Sanskrit Schools, Purasavaukum, Madras :—** "I went through the specimen copies of your Bâlamanóramâ. The publication of this excellent work on Grammar supplies a long-felt want, and I trust every ardent lover of Sanskrit will purchase a copy of the same. The proofs appear to be corrected with care and the execution is very neat. It is a rare undertaking and I wish you every success."

**M. R. Ry. A. V. Gopalachariar Avl, M. A., B. L., High Court Vakil, Trichinopoly :—** "The Bâlamanóramâ is a full and lucid exposition of the Siddhânta Kaumudî. Other commentaries on the Siddhânta Kaumudî, excepting perhaps the Tatvabódhini, are as difficult as the Kaumudi itself. The Bâlamanóramâ explains the Kaumudi so fully and easily that any student can, even without a teacher, understand the Kaumudi fully. Only a very small portion of the Bâlamanóramâ has been printed in *Grantha* characters. Brahmasri Chandrasekhara Sastrigal is doing a very valuable service by publishing the Bâlamanóramâ in *Nagari* characters. He begins with Tinanta, as that portion has not been published at all. The get-up of the publication is excellent. Mr. Chandrasekhara Sastriar is a gentleman of very ordinary means, and he is devoting all his fortune to the publication of this work. For the success of the work he is entirely dependent upon the liberal support of the generous public. I hope that every lover of Sanskrit will buy at least one copy of the book."

**M. R. Ry. C. M. Padmanabhacharyar Avl., B. A., B. L., High Court Vakil, Coimbatore :—** "I received your cards and Sri Bâlamanóramâ Part I per V. P. P. I consider that this edition of Sanskrit Grammar is a very laudable under[illegible]ing, and I wish the editor success. The Kaumudi is an invaluable treasury to all lovers of Sanskrit, and the Bâlamanóramâ is the key to the treasury. The public must therefore be very thankful for a publicatiou of this Commentary in neat Devanagari characters.

# ॥ श्रीबालमनोरमा सिद्धान्तकौमुदीसहिता ॥

## ॥ सरलतमा सुबोधा च सिद्धान्तकौमुदीव्याख्या ॥

**महामहिमशालिनो महाभागाः!**

तत्रभवतां ग्राहकमहाशयानामुदारेणानुग्रहेण, भगवतो भवानीपतेः परमेण करुणाकटाक्षेण च संप्रति सिद्धान्तकौमुदीसहिता श्रीबालमनोरमा द्वाभ्यामप्यर्धाभ्यां संपूर्णमुद्रणाभ्यामासादितरामणीयका चिरादत्र प्रवृत्तमनेकविधक्लेशसहमतितरां मां कृतार्थयतीति "क्लेशः फलेन हि पुनर्नवतां विधत्ते" इति सुकविसूक्तिमात्मनैवाहमनुभवेन प्रमाणयामि । सर्वज्ञमूर्धन्यः कश्चन गुरुः स्वस्य प्रियतमान्तेवासिने सम्यगुपसन्नाय यथा प्रेम्णा विविच्य स्वावगतमखिलमप्यर्थमनाविलमुपदिशेत्, तद्वदियमपि आचार्य-साहाय्यमन्तरेणैव व्युत्पित्सूनामनायासेनार्थावगतिरूपपरमोपकारचिकीर्षया ललितललितया भङ्ग्या विवक्षितं तादृशमर्थमवगमयति, यश्च भाष्यकैयटविवरणादिमहाग्रन्थपरिशीलनक्लेशेनाधिगन्तव्यः । तस्मात् ईदृशमहनीयग्रन्थपठनपरायणैश्शब्दशास्त्रमर्मज्ञैरचिरेण भूयेतेत्यत्र न मनागपि संशयः । इयमेव व्याख्या यथावत् पाणिनिसूत्रार्थप्रकाशने धुरन्धरा । अत्र यथाक्रमं सूत्रस्थपदविभागपरिपाटी, प्राक्तन-सूत्रेभ्यस्समनन्तरसूत्रार्थोपयोगिपदानुवृत्तिक्रमः, अनुवर्तमानपदानां सूत्रस्थपदैस्सहान्योन्यान्वयरीतिः, समुदितवाक्यार्थवर्णनशैली, पदप्रयोजनविचारचातुरी, सूत्राक्षराणां साकल्येन सार्थक्यकथनभङ्गी, विशिष्य वक्तव्यस्थलेषु अन्यूनानतिरिक्ता समीचीनोपन्यसनवैखरी, प्रकृतिप्रत्ययविवेचनसरणिश्च सम्यगेव सन्दर्शिताः ॥

अत्र च पूर्वार्धस्य उत्तरार्धस्य च प्रत्येकं पुटाः सहस्रम् (१०००, १०००=२०००) । सवार्तिकगणपाठाष्टाध्यायीसूत्रादिकश्चात्र रम्यया सरण्या योजितम् । पूर्वार्धविषयसूचिकाः पूर्वार्धे उत्तरार्धविषयसूचिकाः उत्तरार्धे च पृथक् योजिताः ॥

समप्रामिमां बालमनोरमां ग्रहीतुकामाभिः पुस्तकशालाभिः प्रभुभिः द्वीपान्तरवासिभिश्च मूल्यमेकदैव देयं **पञ्चविंशती रूपिकाः** (२५) । अन्यैस्तु **विंशतिः** (२०) । अतिसमीचीनेन बन्धेन सौवर्णाक्षराङ्कितं संपुटद्वयात्मकमिदं भवति । अकिञ्चना इत्यवगमितानां विद्यार्थिनां कृते तु **पञ्चदश** (१५) रूपिकाः परिकल्पिता मूल्यतया । परन्तु बन्धं विना सञ्चिकारूपेणैव एतत्स्यात् पुस्तकम् । पूर्वार्धं वा उत्तरार्धं वा पृथगपेक्षमाणानां विद्यार्थिनां प्रत्येकं रूप्याणि दशैव ॥

ये महाभागाः स्पृहयन्ति **बालमनोरमायै**, तैः **स्वनाम, निजनिवासदेशः, ग्रामः, तालूका, जिल्ला, पोस्द्,** एतत्सर्वं **सुस्पष्टमाङ्गललिप्यैव** लेखनीयं नान्यया लिप्येति सप्रश्रयं प्रार्थये ॥

इदमिदानीमहं गुणग्राहिणस्सहृदयान् अभीक्ष्णं विज्ञापयामि—"एनामतिमहनीयां **बालमनोरमां** समग्रामेव स्वीकृत्य सकृदपि अस्याः उपयुक्ततां प्रत्यक्षतया पठनपाठनादिरूपेणानुभूय मामकप्रयत्नः युष्माभिः सफलीकर्तव्यः" इति—शिवम् ॥

**शं चन्द्रशेखरशास्त्री,** ❖ श्रीबालमनोरमाप्रकाशकः, तेप्पक्कुलं पोस्द्, त्रिच्चिनाप्पल्लि ।

---

[ E. & L. / 97 ]
1,800—15-3-02.

EDUCATIONAL ~~LEGISLATIVE~~ DEPARTMENT.

# NOTES.

11

[ E. & L. / 73 ]
5,000—25-10-10.

Educational DEPARTMENT.

12

8—MAY 1912

C. No. 1034 From ~~the~~ S. Chandrasekhara Sastrigal. No .... , dated 1-4-1912.

SUBJECT. Soliciting Govt. patronage to his Sanskrit publication "Sribalamanorama"

p. 2 of C.F.

Submitted that the books may be forwarded to the D.P.I. wo. for remarks as to whether, as requested by the applicant in para. 8 of his application, copies may with advantage be purchased for any of the educational institutions and if so how many. Please see G.O. No. 63 Edl. dt. 3-2-11 for a precedent.

F.

PR 11-4-12 CR 15/4/12

[initials] 17/4

Edl. no. 1034-1 / 17-4-12

[The books to be sent when the file goes to D.P.I.]

with ~~four~~ books DP 17/4

PD 17/4 || R.P. separately by Regd. parcel Post.

D.P.I. wo.

R.O. 83/12 dated 3-5-12. Office of the D.P.I.

Six copies may usefully be purchased and distributed as follows:-

| | |
|---|---|
| Government Colleges (Presidency, Kumbakonam, Rajahmundry, Mangalore) | 4 |
| Oriental M.S.S. Library | 1 |
| Office of DPI (Sanskrit Sub-Asst Inspector's portion) | 1 |
| | 6 |

EWM
1.5.12

8—MAY 1912 SECRETARIAT

hy

Educational Department

A copy may be ordered for the Connemara Public Library also. The price of a copy is Rs 25.

PR 6/5

2.

2. A draft order is submitted for approval.

PR 6.5.12 CR 7.5.12

I am not at all sure that the Connemara Public Library should be given copies of these works. The precedents are against it. It is a library as far as I know for general reading. But note please.

Zeh/5
5.7.12

PR 8/7

Connemara Public Library is for general reading. It contains also many rare books of reference which are greatly consulted by the public. Besides being a reading library it is a consulting library as well. In order to meet the requirements of a consulting library it is desirable that rare and important publications should be purchased for the library.

2. Sribalamanorama ~~appears to be a full and lucid~~ being an exposition of the "Sidhanta Kaumudi", an advanced Sanskrit Grammar ~~and~~ appears to be a standard work on Sanskrit grammar. If kept in the library it is likely to be consulted by great many people who take a keen interest in the study of Sanskrit but who cannot afford to pay for the book. It seems to be a suitable book for the Connemara Public Library.

S.
X

3 For precedents please see G.O.No. 619 Pub. dt. 20-8-09 and G.O.No. 391 Edl. dt. 4-5-12. There are other precedents also

but they are not available at Ootacamund.

PR CR
10.5.12 12/5/12

H.E. the Governor
the draft is for approval.
[initials]
13.5.12

[initials]
17.5.12

Appd [initials]
17.v.12.

Issue
[initials]
18.5.12

Box 213
14-5-12

[ E. & L. / 74 ]
1,500—8-12-10.

8

Edl DEPARTMENT.

15

READ AGAIN G.O., No. ............, dated ............191 .

" " " " ............, " ............191 .

READ ALSO:—

C. No. 1034, From the mRRy. S. Chandrasekhara Sastrigal. No. -, dated 1-4-1912

" " ............, " " ............, " ............, " ............191 .

" " ............, " " ............, " ............, " ............191 .

ORDER.

mis.

No. 428, dated 18-5-1912.

The Govt. will purchase seven sets of the publication entitled the "Sri Bala-manorama" (including the set now forwarded to Govt.). mRRy S. Chandrasekhara Sastrigal will be requested to arrange for the despatch of the remaining six sets to the D.P.I., Madras, with a bill of charges.

2. On receipt, the copies will be distributed as follows:—

| | |
|---|---|
| Presidency College. | 1 |
| Kumbakonam College | 1 |
| Rajahmundry College | 1 |
| Mangalore College | 1 |
| Oriental MSS Library | 1 |
| Sub. Asst. Inspector of Sanskrit schools | 1 |

Dp 18/5

[initials] 17-V-12

2

16

Connemara Public Library . 1

Total. 7

PR 6.5.12   CR 7.5.12

Ectd 13-5-12

To,

M.R.Ry. S. Chandrasekhara Sastrigal

The D.P.I. (with two volumes of the book)

" A.G.

" Principal Librarian, C.P. Library.

Despd 18/5/12

*When given for copying* ______
*When copied* ______
*When examined* ______ } 191
*When signed* ______

READ AGAIN G.O., No. , DATED
191

CURRENT No.

ENCLOSURES TO C. No.

ORDER OF GOVERNMENT. A A A A A A A

LETTER OF GOVERNMENT.

STATEMENT WITH DITTO.

PAPERS NOT FILED UP, BEING MEANT FOR DESPATCH IN ORIGINAL.

*N.B.*—
A = Copy in full.
B = Not to be copied.
P = Copy abstract only.
Q = Copy Heading only.